## १०. विभूतियोगः

श्रीभगवानुवाच

भूय एव महाबाहो  शृणु मे परमं वचः ।
यत् तेऽहं प्रीयमाणाय  वक्ष्यामि हितकाम्यया ।।१०.१।।
न मे विदुः सुरगणाः  प्रभवं न महर्षयः ।
अहम् आदिर् हि देवानां  महर्षीणां च सर्वशः ।।१०.२।।
यो माम् अजम् अनादिं च  वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु  सर्वपापैः प्रमुच्यते ।।१०.३।।
बुद्धिर् ज्ञानम् असंमोहः  क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो  भयं चाभयम् एव च ।।१०.४।।
अहिंसा समता तुष्टिस्  तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां  मत्त एव पृथग्विधाः ।।१०.५।।
महर्षयः सप्त पूर्वे  चत्वारो मनवस् तथा ।
मद्भावा मानसा जाता  येषां लोक इमाः प्रजाः ।।१०.६।।
एतां विभूतिं योगं च  मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन  युज्यते नात्र संशयः ।।१०.७।।
अहं सर्वस्य प्रभवो  मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां  बुधा भावसमन्विताः ।।१०.८।।
मच्चित्ता मद्गतप्राणा  बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं  तुष्यन्ति च रमन्ति च ।।१०.९।।
तेषां सततयुक्तानां  भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं  येन माम् उपयान्ति ते ।।१०.१०।।
तेषाम् एवानुकम्पार्थम्  अहम् अज्ञानजं तमः ।
नाशयाम्य् आत्मभावस्थो  ज्ञानदीपेन भास्वता ।।१०.११।।

अर्जुन उवाच

परं ब्रह्म परं धाम  पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यम्  आदिदेवम् अजं विभुम् ।।१०.१२।।
आहुस् त्वाम् ऋषयः सर्वे  देवर्षिर् नारदस् तथा ।
असितो देवलो व्यासः  स्वयं चैव ब्रवीषि मे ।।१०.१३।।
सर्वम् एतद् ऋतं मन्ये  यन् मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं  विदुर् देवा न दानवाः ।।१०.१४।।
स्वयम् एवात्मनात्मानं  वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश  देवदेव जगत्पते ।।१०.१५।।
वक्तुम् अर्हस्य् अशेषेण  दिव्या ह्य् आत्मविभूतयः ।
याभिर् विभूतिभिर् लोकान्  इमांस् त्वं व्याप्य तिष्ठसि ।।१०.१६।।
कथं विद्याम् अहं योगिंस्  त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु  चिन्त्योऽसि भगवन् मया ।।१०.१७।।
विस्तरेणात्मनो योगं  विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर् हि  शृण्वतो नास्ति मेऽमृतम् ।।१०.१८।।

श्रीभगवानुवाच

हन्त ते कथयिष्यामि  दिव्या ह्य् आत्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ  नास्त्य् अन्तो विस्तरस्य मे ।।१०.१९।।
अहम् आत्मा गुडाकेश  सर्वभूताशयस्थितः ।
अहम् आदिश्च मध्यं च  भूतानाम् अन्त एव च ।।१०.२०।।
आदित्यानाम् अहं विष्णुर्  ज्योतिषां रविर् अंशुमान् ।
मरीचिर् मरुताम् अस्मि  नक्षत्राणाम् अहं शशी ।।१०.२१।।
वेदानां सामवेदोऽस्मि  देवानाम् अस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि  भूतानाम् अस्मि चेतना ।।१०.२२।।
रुद्राणां शंकरश् चास्मि  वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश् चास्मि  मेरुः शिखरिणाम् अहम् ।।१०.२३।।
पुरोधसां च मुख्यं मां  विद्धि पार्थ बृहस्पतिम् ।
सेनानीनाम् अहं स्कन्दः  सरसाम् अस्मि सागरः ।।१०.२४।।
महर्षीणां भृगुर् अहं  गिराम् अस्म्य् एकम् अक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि  स्थावराणां हिमालयः ।।१०.२५।।
अश्वत्थः सर्ववृक्षाणां  देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः  सिद्धानां कपिलो मुनिः ।।१०.२६।।
उच्चैःश्रवसम् अश्वानां  विद्धि माम् अमृतोद्भवम् ।
ऐरावतं गजेन्द्राणां  नराणां च नराधिपम् ।।१०.२७।।
आयुधानाम् अहं वज्रं  धेनूनाम् अस्मि कामधुक् ।
प्रजनश् चास्मि कन्दर्पः  सर्पाणाम् अस्मि वासुकिः ।।१०.२८।।
अनन्तश् चास्मि नागानां  वरुणो यादसाम् अहम् ।
पितणाम् अर्यमा चास्मि  यमः संयमताम् अहम् ।।१०.२९।।
प्रह्लादश् चास्मि दैत्यानां  कालः कलयताम् अहम् ।
मृगाणां च मृगेन्द्रोऽहं  वैनतेयश्च पक्षिणाम् ।।१०.३०।।
पवनः पवताम् अस्मि  रामः शस्त्रभृताम् अहम् ।
झषाणां मकरश् चास्मि  स्रोतसाम् अस्मि जाह्नवी ।।१०.३१।।
सर्गाणाम् आदिर् अन्तश्च  मध्यं चैवाहम् अर्जुन ।
अध्यात्मविद्या विद्यानां  वादः प्रवदताम् अहम् ।।१०.३२।।
अक्षराणाम् अकारोऽस्मि  द्वन्द्वः सामासिकस्य च ।
अहम् एवाक्षयः कालो  धाताहं विश्वतोमुखः ।।१०.३३।।
मृत्युः सर्वहरश्चाहम्  उद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर् वाक् च नारीणां  स्मृतिर् मेधा धृतिः क्षमा ।।१०.३४।।
बृहत्साम तथा साम्नां  गायत्री छन्दसाम् अहम् ।
मासानां मार्गशीर्षोऽहम्  ऋतूनां कुसुमाकरः ।।१०.३५।।
द्यूतं छलयताम् अस्मि  तेजस् तेजस्विनाम् अहम् ।
जयोऽस्मि व्यवसायोऽस्मि  सत्त्वं सत्त्ववताम् अहम् ।।१०.३६।।
वृष्णीनां वासुदेवोऽस्मि  पाण्डवानां धनंजयः ।
मुनीनाम् अप्य् अहं व्यासः  कवीनाम् उशना कविः ।।१०.३७।।
दण्डो दमयताम् अस्मि  नीतिर् अस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां  ज्ञानं ज्ञानवताम् अहम् ।।१०.३८।।
यच् चापि सर्वभूतानां  बीजं तद् अहम् अर्जुन ।
न तद् अस्ति विना यत् स्यान्  मया भूतं चराचरम् ।।१०.३९।।
नान्तोऽस्ति मम दिव्यानां  विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो  विभूतेर् विस्तरो मया ।।१०.४०।।
यद् यद् विभूतिमत् सत्त्वं  श्रीमद् ऊर्जितम् एव वा ।
तत् तद् एवावगच्छ त्वं  मम तेजोंऽशसंभवम् ।।१०.४१।।
अथवा बहुनैतेन  किं ज्ञातेन तवार्जुन ।
विष्टभ्याहम् इदं कृत्स्नम्  एकांशेन स्थितो जगत् ।।१०.४२।।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः ।।